वराङ्गना वारिभवोत्थवित्ताः श्रेष्ठा रताश्चापि रसायने स्युः। क्रीडासु रामासु महापणेषु मृगाश्ववर्गे दशमेऽतिवित्ताः। शस्त्राग्निभेदखननादिकशौर्य्यभारस्कन्धोपहृत्तिरपि बाहु-बलाद्घटोत्थे। खस्थे गणे ऋषभवे जवशस्त्रवाहयोनि प्रपायनधनानि नरस्य पण्यैः”। भावे घञ्। २आजीवार्थ-मालम्बने। आजीवति कर्त्तरि अच्। ४आजीवनकारिणि” कर्म्माजीवः नृपाजीव इत्यादौ तु आ+जीव–अण्। उप०स० इति भेदः।

**आजीवन** न० आजीवत्यनेन करणे ल्युट्। वृत्त्युपाये भावे ल्युट्। वृत्त्यर्थमुपायग्रहणे “आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः” मनुः “स्त्रीणामाजीवनार्थञ्च प्रदेयं प्रीतिपूर्व्वकम्”। “स्त्रीणामाजीवनत्वयादिति” च स्मृतिः।

**आजीविका** स्त्री आजीवयति आ+जीव णिच्–ण्वुल्। जीविकायां वृत्तौ जीवनार्थे व्यापारे। आ+जीव–कर्त्तरि ण्वुल्। आजीवकः आजीवनकर्त्तरि त्रि०।

**आजीव्य** त्रि० आजीव्यतेऽनेन बा० करणे ण्यत्। आजीवनोपाये १वृत्त्यादौ “आजीव्यः सर्व्वभूतानाम्” रामा० आजीव्यते वृत्त्यर्थमालम्ब्यतेऽसौ आ–जीव–कर्मणि अच्। २वृत्त्यर्थमालम्बनीये नृपादौ। आजीव्यतेऽत्र आधारे बा० ण्यत्। ३आजीवनीयदेशे ‘रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्” मनुः। तेऽपि सर्वे निवर्त्तन्तां येऽपि स्वदानुयायिनः मया यथोचिताजीव्यैः संविभक्ताश्च वृत्तिभिः” भा०व०प० ६३अ०।

**आजू** स्त्री आजवति आ+जु–क्विप् दीर्घः। भृतिं विना कर्मकारके। (वेगार) ‘हठादभृतिकः क्लेशैर्ष्टिराजुश्च कीर्त्यते। इत्युक्ते कर्म्मकरभेदे।

**आजूर्** स्त्री आ+ज्वर–क्विप् ऊठ्। विष्टौ मुकुटः।

**आज्ञप्त** त्रि०आ+ज्ञा–णिच् पुक् क्त ह्रस्वः। आदिष्टे कृतादेशे

**आज्ञप्ति** स्त्री आ+ज्ञा–णिच् पुक् ह्रस्वः। आज्ञायाम्।

**आज्ञा** स्त्री आ+ज्ञा–अङ्। १आदेशे आदेशश्च निकृष्टस्य भृत्यादेः कृत्यादौ प्रवृत्त्यर्थव्यापारभेदः। “आज्ञया नरपतेर्द्विजन्मनां दारकर्मव्रतसूतके तथा। बन्धमोक्षमख-दीक्षणेष्वपि चौरमिष्टमखिलेषु चोडुषु” ज्योति०। “तथेति शेषामिव भर्त्तुराज्ञाम्” कुमा०। “पश्चात् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्” रघुः। “अनतिक्रमणीया दिवस्पतेराज्ञा” शकु०। “दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम्” रघुः “शिरोभिराज्ञामपरे महीभुजः” माघः। २ज्योतिषोक्ते लग्नावधिदशमभावे तन्त्रोक्ते भ्रूमध्यस्थे सुषुम्णानाड्यन्तर्गते ४आज्ञाचक्रे च विवरणमाज्ञाचक्रशब्दे। “आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितेति” तन्त्रम्।

**आज्ञाकर** त्रि० आज्ञया करोति कृ–अच् ३त०। आज्ञानुसारेण कर्मकर्त्तरि दासादौ णिनि आज्ञाकारी तत्रैव त्रि० स्त्रियां ङीप्। क्विप् आज्ञाकृत् तत्रैवार्थे त्रि०।

**आज्ञाचक्र** न० आज्ञासंज्ञकं चक्रम्। तन्त्रप्रसिद्धे देहावस्थितसुषुम्णानाडीमध्यगते भ्रूमध्यस्थे द्विदले पद्माकारे चक्रभेदे। विशुद्धचक्रमुक्त्वा “आज्ञाचक्रं तदूर्द्धन्तु आत्मनोऽधिष्ठितं परम्। आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तिता”। तत्र निहितचित्तस्य पुरुषस्य सर्वपदार्थसाक्षात्कारेण “एवं भूतम्, एवं वर्त्तते, एवं भविष्यतीति” ज्ञानेन गुरोरीश्वरस्य तदूर्द्ध्वं सहस्रदलकमले स्थितस्याज्ञायाः “इतः परं त्वया इत्थं कर्त्तव्यमिति” नियोगस्य संक्रमणं भवति तेन तदाज्ञाख्यं चक्रमित्यर्थः। यथा च षट्चक्राणां देहे स्थितिस्तथोक्तं शारदायाम्। ‘पञ्चाशल्लिङ्गुला-यामं शरीरमुभयात्मकम्। गुदध्वजान्तरे कन्दमुत्सेधाद्-द्व्यङ्गुलं विदुः। तस्य द्विगुणविस्तारं विन्दुरूपेण शोभितम्। नाड्यस्तत्र समुद्भूता मुख्यास्तिस्रः प्रकीर्त्तिताः। इडा वामे स्थिता नाडी पिङ्गला दक्षिणे मता। तयोर्म्मध्यगता नाडी सुषुम्णा वंशमाश्रिता। पादाङ्गुष्ठादपक्रान्ता शिखाभ्यां शिरसा पुनः। ब्रह्मस्थानं समापन्ना सोमसूर्य्याग्निरूपिणी। तस्यामध्यगता नाडी चित्राख्या योगिवल्लभा। ब्रह्मरन्ध्रं विदुस्तस्यां पद्मसूत्रनिभं परम्। आधारांश्च विदुस्तत्र मतभेदाननेकधा। दिव्यमार्गमिमं प्राहुरमृतानन्दकारकम्। इडया सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः। ज्ञातौ योगनिदानज्ञैः सुषुम्णायाञ्च तावुभौ। आधारकन्दमध्यस्थं त्रिकोणमतिसुन्दरम्। ज्योतिषां निलयं दिव्यं प्राहुरागमवेदिनः। तत्र विद्युल्लताकारा कुण्डली परदेवता। परिस्फुरति सर्व्वात्मा सुप्ताहिसदृशाकृतिः। बिभर्त्ति कुण्डली शक्तिरात्मानं हंसमाश्रिता। हंसः प्राणाश्रयो नित्यं प्राणा नाडीपथाश्रयाः। आधारादुत्थितोवायुर्यथावत् सर्व्वदेहिनाम्। देहं प्राप्य खनाडीभिः प्रयाणं कुरुते बहिः। द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः”। तत्त्वचिन्तामणौ षष्ठप्रकाशे। “आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधाम प्रकाशम् हक्षाभ्यां वै कलाभ्यां प्रविल-